# वर्तमानकाले उपनिषत्कथानां प्रासङ्गिकता

डा. पुष्कर आनन्दः

संस्कृतवाङ्मयस्य सुदीर्घपरम्परायां वेदोपनिषद्पुराणेतिहासादिषु कथाऽऽख्यायिकानां भूयिष्ठः प्रयोगः स्वसिद्धान्तप्रसाराय दरीदृश्यते। अमीषां महद्ग्रन्थानामुद्देश्यं न केवलमाध्यात्मिकतत्त्वानाम्बिवेचनमासीत् परञ्च विविधदृष्टान्तयुतकथामाध्यमेन व्यवहारिकोपदेशप्रदानमप्यन्यतमं लक्ष्यम्। यद्यप्युपनिषत्सु वेदानां सारभूतसिद्धान्तानां प्रतिपादनं जीवात्मब्रह्ममोक्षादीनां गूढविवेचनं च सक्षात्समुपलभ्यते परं तत्रैव सुरुचिपूर्णाः अनेकाः विस्तृताः कथाः अपि वर्तन्ते याषां कथानां प्रासङ्गिकताऽद्यापि सिध्यति।

प्रकृतप्रसङ्गेऽस्मिन् उपनिषत्स्वागतेषु विविधकथानां सौन्दर्यपूर्णसाहित्यिकवैशिष्ट्यं किञ्च तासां कथानां प्रासङ्गिकत्वं प्रतिपाद्यते याः पदे-पदे जीवजगदात्मब्रह्ममोक्षसृष्टिविज्ञानञ्च गुरुशिष्यप्रश्नोत्तरद्वारा कथोपकथनमाध्यमेन वा गूढग्रन्थिं सहजेनोद्घाटयति।

सन्दर्भेऽस्मिन् कठोपनिषदः नचिकेतायमसंवादः प्राथम्येन उल्लेख्यते। आख्यानमिदं नचिकेतसः पित्रा समायोजितेन विश्वजित् यज्ञेनारभ्यते। तत्रादौ बृहदैश्वर्यं सर्वत्र दृश्यते परञ्च च यज्ञान्ते वाजश्रवा मोहग्रस्तः भवति। स च तथाविधाः गाः दातुमुद्यतः भवति याः जग्धतृणाः कृशकायाः निरीन्द्रियाः वृद्धाश्चाऽसन्। अवलोक्येदं स्वपितरमनिष्टनिवारणार्थं स्वकीयं जीवितमर्पयितुमुत्सहते। सः ब्रूते ‘कस्मै मां दास्यतीति। द्वितीयं तृतीयं होवाच। तस्य पिता वाजश्रवा क्रोधेन वक्ति—मृत्यवे तवआ ददामीति।’[1] स बालः शान्तचित्तेन निरूद्वेगेन पितुराज्ञापालनाय यमराजं निकषा मृत्युलोकं प्रयाति। नचिकेतसः पितरम्प्रति तथा श्रद्धाभावः विद्यते यत् प्रथमवररूपेण पितृप्रसादमेव इच्छति-





‘शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥’[2]

अत्रेदमवलाकनीयं यत् कठोपनिषदः अयं सदुपदेशः न केवलं सामाजिकेषु आध्यात्मिकीमभ्युन्नतिं वाञ्छति परञ्च सहजकथामाध्यमेन व्यवहारिकं ज्ञानमपि वेदयति। वर्तमानकालिकसमाजे पुत्राणां स्वपितरान् प्रति बालानां युवकानां च श्रेष्ठान् ज्येष्ठान् प्रति यथा हि श्रद्धाऽऽभावः दृश्यते स तु नूनं हि चिन्तनीयो वर्तते। अतः अस्यां परिस्थितौ उपनिषत्कथानां प्रासङ्गिकता वर्धत एव।

अतः परम् आतिथ्यस्य महत्त्वमपि द्रष्टव्यम्। अस्माकं भारतीयसंस्कृतेः आदर्शभूताः ये च संस्काराः सन्ति तेषु आतिथ्यस्य महत्स्थानं वरीवर्त्ति। अनातिथ्येन जीवने का हानिः भवतीति यमपत्नीमुखाच्छ्रूयतामत्र-

‘आशाप्रतीक्षे सङ्गतं सुनृतां च इष्टापूतेल पुत्रपशूंश्च सर्वान्।
एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे॥’[3]

यस्य गृहे आतिथयः अभुञ्जानः तिष्ठन्ति तस्य पुत्रपशवः आशाप्रतीक्षे च, सर्वाणि इष्टानि नष्टानि भवन्ति। इत्थं कठोपनिषदि वर्णितः सामाजिकव्यवहारः वर्तमानकालेऽपि प्रासङ्गिकत्वं भजते। नचिकेतसः कथा बालेषु तथैवाभिरुचिं समुत्पादयति यथा हि प्रौढेषु। अस्य कारणमिदमेव प्रतीयते यत् उपनिषत्सु ऐहिकं पारलौकिकं ज्ञानं च संवादशैल्यामुपनिबद्धं वर्तते अपि च कथायाः नायकः एकः लघुबालकः। सर्वविधज्ञानसंवर्धनाय उपनिषत्कथानामवगाहनं वर्तमानसमये अत्यन्तमावश्यकं प्रतीयते।

अस्मिन्क्रम एव छान्दोग्योपनिषदः रैक्वजानश्रुतिसंवादः उल्लेखनीयो वर्तते। एकदा हंसरूपाः ऋषयः आकाशमार्गे गच्छन्तः रैक्वस्य ज्ञानं दानं च शंसन्ति। तच्छ्रुत्वा तत्कालिकः नृपः जानश्रुतिः रैक्वमन्विषति प्राणानां महत्त्वमुपदिश्यतामित्यनुनयति-

‘रैक्वेमानि षट्शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवताम् उ शाधि यां देवतामुपास्स इति।’[4]

रैक्वः प्राणस्य महत्त्वं विवृणोति– 'अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति, प्राणं चक्षुः प्राणं क्षोत्रं प्राणं मनः प्राणो ह्यवैतान्सर्वान् संस्वृक्ते।'[५]

उपनिषदः इन्द्रियाणामात्माभिमानस्य प्रतीकात्मिका एका अन्या कथाऽपि अत्यन्तं रुचिरा हृद्या च वर्तते यत्र हि प्राणतत्त्वस्य श्रेष्ठत्वं प्रजापतिः स्वयं प्रतिपादयति– 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन् को नः श्रेष्ठ इति।' 'तान् होवाच यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठः।'[६] लोकेऽपि दृश्यते अन्येन्द्रियानां निष्क्रियत्वे जातेऽपि शरीरस्य महत्त्वं नापक्षीयते अपि तु यदा प्राणरहितं शरीरं भवति तदैव जनाः शवं मत्वा शीघ्रं गृहाद्दूरं कुर्वन्ति। इत्थं प्राणा एव सर्वेन्द्रियेभ्यो श्रेष्ठत्वं भजन्ते। आचार्यहजारीप्रसाद्विवेदिना अपि उपनिषद्कथामाधारीकृत्य 'अनामदास का पोथा' इति हिन्दी उपन्यासे 'रयि क्व रयि क्व' इति हंसरवेण रैक्वकथायाः उपस्थापनं बहुसुन्दरं कृतम्।

उद्दालकश्वेतकेतुसंवादे अन्नस्य महात्म्यमपि द्रष्टव्यं यत्र हि दृष्टान्तरूपेण चन्द्रस्य षोडशीकला प्रदर्शिता। उद्दालकः चन्द्रं दर्शयन् श्वेतकेतुमुद्बोधयति। यथा हि चन्द्रस्य षोडशी कला प्रतिदिनं न्यूनतां समवाप्य क्षीणतामाप्नोति तथैव अन्नेन विना जीवोऽपि मन्दं मन्दं क्षीणः अशक्ताश्च भवति। इत्थमत्यन्तासहजतया अन्नस्य महत्त्वमुद्दालकेन स्पष्टीकृतम्।

छान्दोग्योपनिषदः आरुणिश्वेतकेतुसंवादः परमात्मनः सूक्ष्मत्त्वं सिद्धये एकमत्यन्तं प्रायोगिकमुदारहरणं प्रस्तौति तच्च विशालन्यग्रोधवृक्षस्य बीजोदाहरणम्। एकदा आरुणिः श्वेतकेतुमाहूय परमात्मनः स्वरूपं बोधयन् निर्दिशति– 'न्यग्रोधफलमाहर तं भिन्द्धि। भिन्ने कृते सति पुनरादिशति भिन्द्धीति। मुहुर्मुहुः भिन्ने कृत अन्ते किमाप्यवशिष्टं न दृश्यते। ततो आरुणिः स्वपुत्रं निदर्शयति यथा ह्यस्मि् अणुरूपे बीजे विशालन्यग्रोधवृक्षः नाधुना दृश्यते परञ्च अस्मादेव





विशालतरुरुत्पद्यते तथैव परमात्मनः सर्वं जगदुत्पद्यते– 'तं होवाच यं वै सौम्येतमणिमानं न निभालयस एतस्य वै सौम्येषोऽणिम्न एवं महान्यग्रोथस्तिष्ठति श्रद्धस्य सौम्येति।'[७]

उपनिषत्सु परमात्मनः सर्वव्यापकत्वं जले लवणवत्भवतीति दृष्टान्तेन प्रतिपादितम्। इयमपि कथा आरुणिश्वेतकेतुसंवादेन संबद्धा वर्तते। एकदा श्वेतकेतुः परमात्मनः सर्वव्यापकत्व विषये जिज्ञासते तस्य समाधानमत्यन्तासरलतया उद्दालकेनाकारि– 'लवणमेतदुदकेवधायाय मा प्रातरुपसीदथा इति स ह तथा चकार तं होवाच यद्दोषा लवणमुदकेऽबाधा अङ् तदाहरेति। तद्धावमृश्य न विवेद।'[८] पिता पुत्रमनबोधयान् वक्ति जले लवणम् अवधाय पुनः प्रातः ततः निष्कास्य दर्शय। स तथैव करोति परं प्रातः यदा जले लवणमन्विषति तेन जलातिरिक्तं किमपि न पश्यति पुनश्च प्रायोगिकज्ञानार्थं बारम्बारं जलास्वादनं कर्तुं निर्दिशति। लवणमयं जलं पीत्वा पुत्रः पितरं पृच्छति इदं किम्? तदा उद्दलकः शिक्षयति यथा हि सम्पूर्णं जलं लवणमयं विद्यते परन्तु त्वया लवणं पृथकत्वेन न लब्धं तथैव सम्पूर्णब्रह्माण्डे परमेश्वरस्य व्याप्तिः भवति तथापि न केनापि कथमपि दृश्यते केवलं श्रद्धयाऽनुभूयते अत एव श्रद्धस्व इति।

तैत्तिरीयोपनिषदः गुरुशिष्यसंवादोऽप्यत्र उल्लेखनीयो वर्तते। सामाजिकेभ्यो छात्रेभ्यश्च अत्यन्तं हितकरं वचनं श्रूयते गुरुमुखादित्थं– 'सत्यं वद। धर्मं चर। स्वाध्यात्मा प्रमद।...मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। यान्यवद्यानि कर्माणि तानि सेवितव्यानि।'[९] वर्तमानसमाजे ईदृक्षाणां सदाचारोपदेशानानमत्यन्तमावश्यकताऽनुभूयते। आशयः अयमेव अस्ति यथा हि कथासरित्सागरपञ्चतन्त्रहितोपदेशादीनां सम्बादाः समाजे सहजेन श्रूयन्ते, सामाजिकाश्च कान्तासम्मितवधूपदेशं श्रावं श्रावं सन्मार्गे स्वात्मानं नयन्तीति तथैव सहृदयाः जनाः उद्दालकश्वेतकेतुसत्यकामजाबालियाज्ञवल्क्यजनकादीनां साहित्यसौन्दर्यपूर्णं रसावहं संवादं कथानकञ्च श्रूत्वा ताभिर्कथाभिरात्मानमुद्धर्तुं शक्नुवन्ति।

तात्पर्यमिदमेव अमीषां कथानामपि अपि समाजे दृश्यश्रव्यमाध्यमेन आधुनिकयुगानुसारं श्रावणं पाठनं वाचनञ्च सोत्साहेन भवेत् येन सामाजिकानामभ्युन्नतिर्निश्चप्रचं जायेत।

——

**पादटीका**

१. कठोपनिषद्- १.४
२. तत्रैव १.१०
३. तत्रैव १.८
४. छान्दोग्योपनिषद् ४.२.२
५. तत्रैव ४.३.३
६. तत्रैव ५.१.७
७. तत्रैव ६.१२.२
८. तत्रैव ६.१३.१
९. तैत्तिरीयोपनिषद्-शिक्षा वल्ली अनुवाक् ११

**सन्दर्भाः**

१. कठोपनिषद्- गीता प्रेस, गोरखपुर
२. छान्दोग्योपनिषद्- चौखम्बा विद्याभवन, प्राच्यविद्या ग्रन्थमाला
३. तैत्तिरीयोपनिषद्- गीता प्रेस, गोरखपुर
४. उपनिषदों में काव्यतत्त्व- विश्वेश्वरानन्द वैदिक शोध संस्थान्, कृष्णकुमार धवन, १९३६





# Influence of Religious Texts on the Indian Society

**Mrs. Sukanya Senapati**

**Introduction :**

It is said that literature is the mirror of the society. Thie means that every literature is composed and prospers on the basis of different aspects and characteristics of a society. Such an observation is very much true and logical. But opposite to this theory, it is also true that sometimes the society becomes the mirror of literature. For example, Indian cinemas may or may not reflect our contemporary society, but our society very much reflects the contemporary cinemas. This shows a society is influenced by literature, the manner in which it is influenced by the cinemas.

A society is influenced by literature in two ways. There are many such literary works which do not enjoin anything in particular upon the society for doing something good or to refrain from anything bad. Such literary works may be called passive literature. On the other hand, there are many such literary works in our Indian tradition which directly prescribe something to do upon the society and prohibit many things in case of the same.

In this write-up I wish to highlight the ways in whcih our society has been influenced immensely by some religious writings. *Srimad Bhagavad Gita* and *Srimad Bhagavata* are the two most popular and powerful religious works which have influenced the Indian society the most for centuries together. for example- the ordinary convention in a society is that a son should follow and serve his parents during their old age. But *Srimad Bhagavata* says- ‘A person, who has dedicated his

whole life to the service of the Almighty Lord, is not obliged to serve his parents or his other dependants.'

We know that a human being is indebted to teh demigods, the seers and to his forefathers mere by one's getting birth on this earth.[1] This is because all the natural resources like air and water are provided by the demigods, such as the wind-god, the Indra, for which all the living beings including the humans are indebted to them.

A human being becomes knowledgeable and understands the does and dont's on the basis of the counsels of the seers and the sages who have handed over to us their experiences in the form of different sciences. Therefore one is indebted to them as well.

We human beings, unlike other animals, depend so much on our parents and grand-parents for our gorwth and development that we become indebted to them also. Apart from all these three types of debts upon us, another type of debt is caused by the society we live in, upon all of us. Because when a child gradually grows up to an adult, the society extends him support in that process, for which he is indebted to many of the persons of his society. It has been told in the Mahabharata-

ऋणैश्चतुर्भिःसंयुक्ता जायन्ते भुवि मानवाः।
पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः॥ आदिपर्व. १२०.१७

This means, we all human beings are indebted to different agencies, from our very birth here in this material world.

In our Indian society we see this vividly that our fathers and fore-fathers worship the demigods, the sages and the seers, in the fom of reading their writings with reverence and regularity and respecting them through the contemporary ones due to their physical absence. They also regularly perform rites for their fore-fathers to be absolved of the debts caused by them. Also, we, as human beings, love and respect our fellow beings and do them certain favors at times to free ourselves from their debts, even unknowingly.





Such practices in our society have been recommended by our scriptures. In our *Dharmasastras* five *maha-yajnas* have been prescribed for the householders for getting rid of the above-mentioned debts. It has been said in the *Manusmrti*-

ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्॥ मनुसंहिता ४.२१

Through these five *yajnas* freedom from the debts mentioned before has been prescribed. The nature of those *yajnas* has been described further in another verse which says-

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥ मनुसंहिता ३.७०

These *yajnas* or the practices mentioned in this verse are the bindings upon a person who is following the householder's life (गृहस्थाश्रम). But when someone is out of गृहस्थाश्रम system he need not follow these injunctions if and only if he is completely surrendered to the Almighty Lord of this universe. In this context Srimad Bhagavata says-

देवर्षिभूताप्तनृणां पितृणां न किङ्करो नायमृणी च राजन्।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्त्तम्॥
भागवतम्. ११.५.४१

This means 'O king, renouncing all the obligations (or the notion of separateness from the Lord), he who whole heartedly and completely resorts for protection to the protecting Lord is not more a servant of or debtor to the deities, *Rsis* or other creatures, relations or other men (newcomers) and deceased ancestors. (Such a person discharges all his responsibilities merely by seeking refuge in the Lord).

It has been told in the *Upanisads* that all the demigods like the sun and the moor perform their respective duties out of fear from the Almighty Lord.[2] This means that the Almighty

Lord is the controller and the root cause of all the demigods, the human beings, who are under the control of the latter ones, and of all this cration. Therefore, if someone serves the Almighty Lord whole heartedly, it must be understood that he/she has resorted to the most perfect path in the journey of this human life. It is not possible on the part of a human being to please one and all. But merely by pleasing the Almighty Lord one can please everybody in this universe. To substantiate this fact *Srimad Bhagavata* says :

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या॥

भागवतम्, ४.३१.१४

This means- Even as the stem, boughs and side-branches of a tree are nourished by watering its roots and just as all the Indriyas (the senses of perception as well as the organs of action) are nourished by sustaining life through food, so through offering reverence to the Immortal Lord all are worshiped. This concept of serving the Almighty Lord, having abandoned all other duties prescribed by Him only, has been substantiated in the *Srimad Bhagavad Gita* as well. It has been said by Almighty Lord *Sri Krsna* to His dear devotee Arjuna-

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

भगवद्गीता, १८.६६

This means- Resigning all your duties to Me, the all-powerul and all-supporting Lord, take refuge in Me alone. I shall absolve you of all sins, worry not. In this respect Goswami Tulasi Dasa says-

सनमुख होइ जीव मोहि जबहिं।
जन्म कोटि अघ नाशहिं तबहिं॥

मानस–सुन्दरकाण्ड, ५४





**Conclusion :**

Therefore, the scriptures written in Sanskrit, which prescribe the system of *varnasrama*, also vehemently advocate for the abandonment of the duties of the man and serving to the Almighty Lord for the real success in human life. These scriptures have very much influenced our society in both the forms of human behavior. We come across people who lead their lives in the system of *varnasrama* and in the same time we see people those who have abandoned their *varnasrama* duties and lead exclusive spiritual lives for their own benefit and for the benefit of others.

It may be noted that the people who exclusively follow the path of renunciation are more adorable than the others in our society. It cannot be debated that the fame and respect of even the most successful persons in the system of *varnasrama* can equal with the respect and adoration which is bestowed upon the renouncing saints life Tulasi Dasa, Kabir Dasa, Tukaram, Swami Vivekananda, Sri Aurobindo and many such other saintly personalities of our land.

—

ISSN 2320-2025

**Foot note :**

1. ऋणी ह वै जायते योऽस्ति स जायमान एव देवेभ्य ऋषिभ्य पितृभ्य। शतपथब्राह्मण।

2. भीषास्माद्वातः पवते। भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः। (तैत्तिरीयोपनिषद् २.१)

**Referenes :**


1. Bhagavata Purana (with bhavarthadipika), Edited by Prof. J. L. Shastri, Motilal Banarasidass, 1999.
2. Srima Bhagavad Gita (with Gudhartha Dipika), Chowkhamba Sanskrit Bhawan, Varanasi, 2014
3. Srimad Bhagavata Mahapurana (with Sanskrit Text and English Translation), Part, 1 & 2, Gita Press, Gorakhpur, 1997
4. Taittiriyopanisad by Swami Sharvananda, Ramakrishna Math, Mylapore, Madras, 1921.





ISSN 2320-2025

# संस्कृतभाषासामर्थ्यविकाशाय कथासाहित्यम्

**विश्वजित् प्रामाणिकः**

**उपोद्घातः**

किञ्चन प्राचीनं नाम, तस्मिन्नेव जनाः रमन्ते। प्राचीनाः पूर्वजाः वा रमेरन्, किन्तु आधुनिकाः अपि रमन्ते। सा भवति सर्वेषां विपश्चितां विद्यासुगन्धाधृतवतां परिष्कृता, परिशुद्धा, विदुषां मनोहारिणी, वेदपुराणेतिहासशास्त्रेषु विज्ञानसाहित्यप्रज्ञानग्रन्थानामाधारभूता, सकलहृदयस्थिता, समस्तमुनिमहर्षिमहाकवीनां जिह्वायां नर्तकी, सर्वासां भाषाणां जननीस्वरूपिणी, अल्पाक्षरानल्पाक्षरसम्पन्ना, सुमनोललितपदसमाकलिता, मलदुमधुरसुन्दरसुकुमारकाव्यसहिता, संस्कारवतां भाषा 'संस्कृतभाषा' इति। संस्कृतं भारतस्य आत्मा यथा आत्मानं विहाय शरीरं जडपदार्थत्वेन परिगणितं भवति, तथैव इदम् आत्मभूतं संस्कृतं विहाय भरतमपि शून्यमिव प्रतिभातं भवति। अतः उच्यते—'विना वेदं विना गीतां विना रामायणीं कथाम्। विना कविं कालिदासं भारतं भारतं नहि।' विश्वविश्रुतः विदेशी विद्वान् Sir William James वदति—'The Sanskrit language, whatever be its antiquity, is of wonderful structure refined than the either.' (Inauguration Asiatic Society of India in 1786) इयं देववाणी सुरभारती नाम्ना प्रशंस्यते व्यवह्रियते ज्ञायते च।

विपुलसंस्कृतसाहित्यजगत्यस्मिन् प्रथते कथासाहित्यम्। संस्कृतसाहित्येतिहासे कथासाहित्यं किञ्चन विशिष्टस्थानम् अधिकरोति। इयं व्याप्तिः प्राचीनता च अस्मान् विस्मितान् करोति। कथासाहित्यं न केवलं संस्कृतसाहित्ये गौरवम् अवर्धयत्, अपि तु विश्वसाहित्ये अपि इदम् अतिविशिष्टं स्थानम् अध्यकरोत्। अतः एव समग्रे विश्वे इदं काव्यं सादरं गृह्यते। विविधभाषासु अनुवादस्य कारणात् सा धारा अद्यापि प्रवहन्ती अस्ति।

कथाश्रवणस्य इच्छा स्वाभाविकतः मानवमनसि चिरकालं यावत् विद्यमाना आसीत्। द्विसहस्रात् वर्षेभ्यः अपि अधिककालं यावत् रामायणमहाभारतयोः पुराणानां च कथा जनानां मुखे मुखे प्रचलिता वर्तते। कतासाहित्यस्य सृष्टेः पृष्ठतः प्रधानतः कारणद्वयम् अस्ति, तद्यथा प्रथमम् कथापठनद्वारा आनन्देन अवसरयापनम्, द्वितीयञ्च कोमलमतिभ्यः बालेभ्यः कथाकथनद्वारा नीतिशिक्षप्रदानञ्च इति। कथासाहित्यस्य गुणकीर्तनं कुर्वन् नारायणः अकथयत् यत्—'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्। कथाच्छलेन बालानां नीतिस्तदिह कथ्यते।'

विष्णुशर्मणः पञ्चतन्त्रम्, नारायणशर्मणः हितोपदेशः, बुद्धस्वामिनः बृहत्कथाश्लोकसंग्रहः, बृहत्कथामञ्जरी, सोमदेवस्य कथासरित्सागरः, शिवदासस्य बेतालपञ्चविंशतिः, चिन्तामणिभट्टस्य शुकसप्ततिकथा, सिंहासनद्वात्रिंशिका, विद्यापतेः पुरुषपरीक्षा इत्यादिकथाः कथासाहित्ये नितरां प्रसिद्धाः सन्ति।

भाष्यते अनया इति भाषा। संस्कृतं काचित् भाषा, कारणं वयं संस्कृतेन भाषामहे। कश्चन गुरोः समीपात् संस्कृतभाषाज्ञानं प्राप्नोति, कश्चन शिविरादिषु पठित्वा संस्कृतभाषायाः ज्ञानं प्राप्नोति। कश्चन वा स्वाध्यायबलात् संस्कृतभाषायाः ज्ञानं प्राप्नोति। इत्थं भाषाध्ययनं सरलं कार्यं नास्ति। भाषाम् अधीत्य भाषास्तरवर्धनं बहुभिः इष्यते। कैश्चित् भाषास्तरवर्धनाय महान् प्रयासः अपि क्रियते। तथापि केषाञ्चन भाषास्तरः पूर्ववत् एव तिष्ठति। केषाञ्चन भाषास्तरः किञ्चित् वा वर्धते। भाषास्तरवर्धनाय बहवः उपायाः सन्ति। विद्यमानोपायेषु कथासाहित्याध्ययनद्वारा अपि वयम् अस्माकं भाषास्तरं बर्धयितुं शक्नुयाम। कस्यचित् अपि कथासाहित्यस्य अर्थज्ञानपुरस्सरम् अवधानपूर्वकम् अध्ययनम् कदाचित् अस्माकं मनसि आनन्दानुभवमेव न जनयेत्, अपि च अस्माकं संस्कृतभाषाप्रयोगसामर्थ्यमपि बर्धयेत्। कस्यचित् अपि साहित्यस्य सार्थम् अध्ययनम् अस्माकं संस्कृतभाषायाः





ज्ञानबर्धनं करोत्येव। विविधकथापण्डितैः रचितासु विविधासु कथासु उत्तमाः, श्रेष्ठाः, दिव्याः, श्रुतिमधुराः प्रयोक्तुं योग्याः विविधसरसप्रयोगाः कृताः। तेषां शब्दानां प्रयोगानां वा परिशीलनेन वयम् अस्माकं भाषासामर्थ्यं बर्धयितुं शक्नुमः निश्चप्रचम्। अस्मिन् लेखे इदमेव मुख्यम् उद्देश्यं वर्तते।

**संस्कृतभाषासामर्थ्यविकाशस्य कारणानि**–

१. सर्वेऽपि संस्कृताध्येतारः संस्कृतभाषया न भाषन्ते।

२. शिविरादिषु भाषां ज्ञातवन्तः अध्येतारः अत्यन्तं सरलभाषया भाषन्ते।

३. संस्कृतभाषाप्रयोगसन्दर्भे तेषां रुचिः न भवति।

४. संस्कृतसाहित्यादिषु उत्तमाः उत्कृष्टाः प्रयोगाः वर्तन्ते।

५. भाषास्तरबर्धनाय छात्राणां रुचिः न जायते।

६. उत्तमस्तरीयभाषाबोधार्थं योग्याः संस्कृताध्येतारः न सन्ति।

**संस्कृतभाषासामर्थ्यविकाशस्य उद्देश्यानि**–

१. अध्येतुः संस्कृतभाषायां सामर्थ्यविकासः।

२. संस्कृतभाषायां प्रयोगसामर्थ्यस्य प्राप्तिः।

३. कथासाहित्यस्य अध्ययनम्।

४. कथासाहित्ये विद्यमानानां शब्दानां ज्ञानम्।

५. नूतनशब्दैः सह परिचयः।

६. नूतनशब्दानां प्रयोगे रुच्युत्पादनम्।

७. कथासाहित्ये विद्यमानानां नूतनशब्दानां प्रकृतिप्रत्ययादिनिरूपणम्।

८. कथासाहित्यं विहाय प्रयोगदृष्ट्या अन्यविधसाहित्यस्य अध्ययनरुचिजागरणम्।

**संस्कृतभाषासामर्थ्यविकाशस्य क्षेत्राणि**–

संस्कृतभाषासामर्थ्यवर्धनम् एषु क्षेत्रेषु सम्भवति, यथा– १. गद्यरचना, २. पद्यरचना, ३. कथारचना, ४. श्लोकरचना, ५. संस्कृतेन भाषणम्, ६. अनुवादसंरचना, ७. पुस्तकरचना, ८. लेखरचना इत्यादि।

**प्रयोगदृष्ट्या कथासाहित्याध्ययनम्–**

**पञ्चतन्त्रम्–**

पञ्चभिः तन्त्रैः समन्वितास्य पञ्चतन्त्रस्य रचयिता अशीतिवर्षदेशीयः शास्त्रनिष्णातः पण्डितः विष्णुशर्मा। मित्रभेदः, मित्रसम्प्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकम् इति पञ्च तन्त्राणि अस्य ग्रन्थस्य विद्यन्ते। बालकेभ्यः नैतिकं धार्मिकं व्यवहारिकं शिक्षादानं च पञ्चतन्त्रस्य प्रधानम् उद्देश्यम्। ललिता हृदयग्राह्या पञ्चतन्त्रस्य भाषा अस्माकं हृदयं रञ्जयति। अस्य वाक्यविन्यासः सरलः सुगमश्च। कुत्रचिदपि क्लिष्टस्य वा दुर्बोध्यस्य शब्दस्य प्रयोगः ग्रन्थकारेण श्रीविष्णुशर्मणा न कृतः। संस्कृतभाषासामर्थ्यविकाशाय पञ्चतन्त्रस्य मित्रभेदाख्यकारकं परिलक्ष्य परिशीलितशब्देषु अत्र इमे शब्दाः प्रस्तुयन्ते। एषां शब्दानां सावधानं प्रयोगपुरस्सरम् अध्ययनं वयं यदि कुर्याम् तर्हि अस्मदीयः भाषास्तरः बर्धेत निश्चप्रचम्।

विष्णुशर्मवर्येण विरचितस्य पञ्चतन्त्रग्रन्थस्य मित्रभेदनामकात् भागात् प्रदर्शितान् एतान् शब्दान् विहाय अन्ये इतोऽपि केचन शब्दाः अत्र प्रस्तूयन्ते। येषाम् अभ्यास्येनापि भाषास्तरवर्धनं सम्भविष्यति। ते यथा– भूयः, शिवम्, साधिक्षेपम्, व्यङ्गयितुम्, विशिष्यते, अलीकम्, मान्द्यम्, उद्धरन्ति, अनृतम्, स्वभावजाः, विडम्बयन्ति, रमयन्ति, मुक्तः, नूनम्, विघातः, उद्यमः, पोतभङ्गः, निषेवते, समुत्क्षिप्य, आशु, सकामम्, विडम्बयसि, रञ्जयित्वा, सविस्मया, सानुरागः, अविकल्पम्, सान्वयम्, निशीथे, निभृतः, सगूढः, समेत्य, सम्बोध्यः, जर्जरितदेहः, साम्प्रतम्, संक्रमणम्, अनावृष्टिः इत्यादि।

**बेतालपञ्चविंशतिका–**

पञ्चविंशत्या कथाभिः वर्णितः अयः ग्रन्थः शिवदासेन विरचितः। इमाः कथाः राज्ञः विक्रमस्य न्यायशक्तिं बोधयन्ति। इमाः





| क्र. | शब्दाः | संस्कृतार्थः | हिन्द्यर्थः | वङ्गार्थः | आङ्ग्लार्थः |
|---|---|---|---|---|---|
| १. | सुमनोहरम् | बालादिमनोहारि | मनोहर | মনোহর | Beautiful |
| २. | पारङ्गतः | तत्त्वदर्शी | पारङ्गत | পারঙ্গত | Accomplished |
| ३. | सौख्यम् | सुखम् | सुख | সুখ | Happiness |
| ४. | साधु | युक्तम् | ठीक | ঠিক | Exactly |
| ५. | प्रभूतम् | प्रचुरम् | विपुल | প্রচুর | Lots |
| ६. | सुजनायते | सुजनवदाचरति | सद्व्यवहार करते है | সজ্জনের মত আচরণ | Behave like a gentleman |
| ७. | निःस्वम् | निर्धनम् | निर्धन | নির্ধন | Poor |
| ८. | सम्प्रधार्य | निश्चित्य | सोच विचार कर | বিচার করে | Judge by |
| ९. | अभीष्टः | प्रियः | प्रिय | প্রিয় | Dear |
| १०. | प्रवदन्ति | स्तुवन्ति | स्तव करना | স্তব করা | Praise |
| ११. | अन्वितः | युक्तः | युक्त | যুক্ত | Connection |
| १२. | आकीर्णाः | व्याप्ताः | व्याप्त | ব্যাপ্ত | Extending |
| १३. | क्षिप्रम् | शीघ्रम् | शीघ्र | শীঘ্র | Soon |
| १४. | अभिमतम् | अभिप्रायः | अभिप्राय | অভিপ্রায় | Intention |
| १५. | परिहीयते | नश्यति | भङ्ग हो जाना | খারাপ হয়ে যাওয়া | Become desolate |

| नं | शब्दाः | संस्कृतार्थः | हिन्द्यर्थः | वङ्गार्थः | आङ्गलार्थः |
|---|---|---|---|---|---|
| १६. | विचक्षणाः | कुशलाः | कुशल | কুশল | Weal |
| १७. | निवेद्य | उक्त्वा | कह कर | বোলে | By saying |
| १८. | आतुरः | व्याकुलः | व्याकुल | ব্যাকুল | Ardent |
| १९. | विमर्शयेत् | विचारयेत् | विचार करना | বিচার করা | To judge |
| २०. | व्यापादयितुम् | निहन्तुम् | मारने की इच्छा | মারতে | To kill |
| २१. | सम्प्रधार्य | निश्चित्य | विचार करके | নিশ্চিত করে | By considering |
| २२. | सोच्छवासम् | दीर्घश्वासं विमुच्य | दीर्घश्वास त्याग करके | দীর্ঘনিঃশ্বাস ত্যাগ করে | Take a deep breath |
| २३. | परितृष्टः | प्रसन्नः | प्रसन्न | প্রসন্ন | Glad |
| २४. | सप्रश्रयम् | सस्नेहम् | खुशामद रूप से | আনন্দের সঙ্গে | Comfortably |
| २५. | प्रत्यूषे | प्रभाते | प्रभात काल में | সকালে | In the morning |
| २६. | सुगूढम् | रहस्यपूर्णम् | गुप्त | গোপন | Secret |
| २७. | निष्पीड्य | निष्पीडनं कृत्वा | निचोड़ कर | নিঙরিয়ে | By squeezing |
| २८. | विलप्य | विलापं कृत्वा | विलाप करके | বিলাপ করে | Lamented |
| २९. | सोद्वेगः | शोकाकुलः | उद्विग्न | উদ্বিগ্ন | Concerned |
| ३०. | सविनयम् | सादरम् | आदर से | আদরের সঙ্গে | With respect |





| नं | शब्दाः | संस्कृतार्थः | हिन्द्यर्थः | वङ्गार्थः | आङ्गलार्थः |
|---|---|---|---|---|---|
| ३१. | पराङ्मुखः | विरक्तः | विरत | বিরক্ত | Irritated |
| ३२. | नक्तन्दिवम् | अहर्निशम् | रात दिन | রাত দিন | Ceaselessly |
| ३३. | विश्वस्तः | जातविश्वासः | विश्वास करना | বিশ্বাসের পাত্র | The vessel of faith |
| ३४. | हस्तगतः | मद्वशगः | हाथ में आना | হাতে আসা | Obtained |
| ३५. | स्फुटवक्ता | स्पष्टवादी | साफ एवं खरी बात कहने वाला | স্পষ্ট কথা বলে যে | Outspoken |
| ३६. | सप्रश्रयम् | सस्नेहम् | आत्मीयभाव, विश्वास एवं नम्रता | স্নেহের সাথে | With affection |
| ३७. | संपद्यते | जायते | होता है | হয় | To be |
| ३८. | फूत्कर्तुम् | रोदितुम् | रोता हुआ | কাঁদার জন্য | For crying |
| ३९. | परितोषः | सन्तोषः | सन्तुष्टिः | সন্তুষ্টি | Satisfaction |
| ४०. | भव्यम् | सुन्दरम् | सुन्दर | সুন্দর | Pretty |

कथाः भारते विद्यमानेषु कथासाहित्यग्रन्थेषु अत्यन्तं लोकप्रियाः सन्ति। गुणाढ्यस्य बृहत्कथानामकात् ग्रन्थात् अस्य ग्रन्थस्य रचना अभूत्। संस्कृतभाषासामर्थ्यविकाशदृष्ट्या एतस्मात् ग्रन्थात् केचन शब्दाः परिशीलिताः सन्ति। यान् वयं भाषासामर्थ्यविकाशाय प्रयुञ्जमहे चेत् अस्मदीया भाषा निश्चयेन विशिष्टा भविष्यति। इमे शब्दाः यथा– आरोप्य, अनुद्विग्नः, श्रमविनोदः, अदग्धः, कदाचित्, विन्यस्य, सुखासक्तः, सततम्, अतन्द्रितः, प्रक्षिप्य, जनवादः, प्राब्रवीत्, समुत्पन्नम्, अनुमन्यताम्, निःस्पृहः, अनुशिष्टः, आकर्ण्य, मृग्यते, उन्मुखः, निवार्य, अतर्कितः, सन्तप्तः, विश्रान्तः, तीर्थयात्रार्थी, उद्यतः, परिश्रान्तः, विश्रम्य, अवतार्य्य, आदाय, पलाय्य, सम्भूय, सविनयम्, सम्मन्त्र्य, अनुनीय, उपपद्यते, निशम्य इत्यादीनि।

**हितोपदेशः**

मित्रलाभसुहृद्भेदविग्रहसन्ध्यादिभिः खण्डैः समन्वितः हितोपदेशः पण्डितप्रवरेण नारायणशर्मणा विरचितः। ख्रिष्टीयचतुर्थशतके अयं ग्रन्थः विरचितः। जीवने गमनमार्गे आशा, द्वन्द्वः, बाधा, विपत्तिः, लोभः, मोहः इत्यादीन् प्रत्यहं सम्मुखीकृत्य मनुष्यः कं मार्गम् उपसर्पेत् इत्यादीनां प्राथमिकः दिङ्निदेशः अस्मात् ग्रन्थात् अस्माभिः प्राप्तुं शक्यते। सरलगद्यस्य कश्चन काव्यमयप्रकाशः वर्तते अयं हितोपदेशः। अस्मिन् ग्रन्थे सरलतायाः रूपं दृष्ट्वा काठिन्यस्य भावः एव न दृश्यते। अस्माभिः सम्भाषणकाले कदाचित् अत्र प्रयुक्तानां शब्दानां प्रयोगः क्रियते। 'हिरण्यकः अपि आह—अहम् **अल्पशक्तिः**। दन्ताश्च मे **कोमलाः**। तदेतेषां पाशान् **छेत्तुं** कथं समर्थः। तत् यावत् मे दन्ताः न **त्रुट्यन्ति** तावत् तव पाशं **छिनद्मि**।' इत्यस्मिन् पद्यभागे काठिन्यं कुत्र वर्तते। यः कोऽपि संस्कृताध्येता अस्य अर्थावगमने समर्थः स्यादेव। संस्कृतभाषासामर्थ्यविकाशदृष्ट्या अस्मिन् ग्रन्थे बहवः एतादृशाः प्रयोगाः दृश्यन्ते, ये खलु अस्माभिः नित्यं प्रयोक्तुं शक्याः।





| नं | शब्दाः | संस्कृतार्थः | हिन्द्यर्थः | वङ्गार्थः | आङ्ग्लार्थः |
|---|---|---|---|---|---|
| १. | आकृष्य | आदाय, संक्षिप्य | आश्रय से | গ্রহণ করে | pulled something towards oneself |
| २. | विश्रूयते | लोके महीयते, धन्यः मन्यते | प्रसिद्धि और प्रशंसा होती है | প্রসিদ্ধ হওয়া | Fame and admiration |
| ३. | निहत्य | तदुपेक्ष्य, तन्मुखप्रेक्षितां विहाय | छोड़कर | পরাভূত করে | Excepting |
| ४. | प्रच्छन्नः | सगूढः | छिपकर | লুকিয়ে থাকা | Secretly |
| ५. | प्रोज्झितुम् | मार्जयितुम् | मिटाना | খণ্ডানো | Erase |
| ६. | गुणोपेतः | गुणयुक्तः | गुण से भूषित | গুণী | Meritorious |
| ७. | आकर्ण्य | श्रुत्वा | सुनकर | শুনে | On hearing |
| ८. | सकृत् | एकवारम् | एक बार | একবার | Once |
| ९. | अतिदुष्करम् | कठिनम् | कठिन | দুষ্কর | Difficult |
| १०. | निरर्थकम् | निष्फलम् | व्यर्थ | নিরর্থক | Meaningless |
| ११. | वस्त्रवेष्टितः | वस्त्रावृतः | कपड़ा पहन कर | পোষাক পরিচ্ছদে ভূষিত | Wearing clothes |
| १२. | संसर्गः | मेलनम् | सम्बन्ध | সংসর্গ | Intercourse |
| १३. | दीप्यते | शोभते, प्रकाशते | चमकना | দীপ্যমান হয় | Shine |
| १४. | पुरस्तात् | अग्रे | सामने | কাছে | Front |

| नं | शब्दाः | संस्कृतार्थः | हिन्द्यर्थः | वङ्गार्थः | आङ्गलार्थः |
|---|---|---|---|---|---|
| १५. | प्रस्तूयते | प्रारभ्यते | प्रारम्भ किया जाता है | শুরু করা হচ্ছে | Getting Started |
| १६. | आद्यः | प्रथमः | पहला | প্রথম | The first |
| १७. | विकीर्य | प्रसार्य | छींट कर | ছড়িয়ে | Spread |
| १८. | विस्तीर्णम् | विस्तारितम् | फैला दिया | পাতল | Spread it |
| १९. | निर्जनम् | जनहीनम् | निर्जन | নির্জন | Desolate |
| २०. | अतीत्य | अतिक्रम्य | अतिक्रम करके | ছাপিয়ে গিয়ে | By encroaching |
| २१. | सुजीर्णम् | सुपक्वम् | पका हुआ | পরিপাক হয়ে যাওয়া | Ripe |
| २२. | सदर्पम् | सावष्टम्भम् | सगर्व | সদর্প | Pridefully |
| २३. | विपन्नः | विपद्ग्रस्तः | विपत्तिग्रस्त | বিপদ্গ্রস্ত | Disastrous |
| २४. | ससम्भ्रमम् | सत्वरम् | शीघ्र | সত্বর | Fast |
| २५. | प्रत्यभिज्ञाय | विज्ञाय | पहचान कर | চিনতে পেরে | By identifying |
| २६. | सम्मतम् | अनुमतम् | सम्मत | সম্মত | Consent |
| २७. | उत्सृजेत् | दद्यात् | समर्पण करना | উৎসর্গ করা | Dedicate |
| २८. | पुलकितः | जातरोमाञ्चः | रोमाञ्च | পুলকিত | Delighted |
| २९. | युज्यते | युक्तमिति सम्भाव्यते | योग्य | মানায় | Suitable |





| नं | शब्दाः | संस्कृतार्थः | हिन्द्यर्थः | वङ्गार्थः | आङ्गलार्थः |
|---|---|---|---|---|---|
| ३०. | प्रबोध्य | सान्त्ववाक्यैः मनः समाधाय | समझा बुझाकर | সান্ত্বনা দিয়ে | Make understand |
| ३१. | साश्चर्यम् | आश्चर्यपूर्वकम् | आश्चर्य में | বিস্মিত হয়ে | In wonder |
| ३२. | हृष्टपुष्टाङ्गः | प्रहृष्टसंपुष्टपीवरतनुः | हृष्ट पुष्ट | হৃষ্ট পুষ্ট | Plump |
| ३३. | सुललितम् | सुमधुरम् | मधुर | নরম | Melodious |
| ३४. | यथोचितम् | यथायोग्यम् | यथोचित | উপযুক্ত | As appropriate |
| ३५. | परिज्ञाय | दृष्ट्वा | देख कर | জেনে | Look over |
| ३६. | निभृतम् | एकान्ते | एकान्त में | গোপনে | Solitarily |
| ३७. | मुहुर्मुहुः | वारंवारम् | बार बार | বারংবার | Repeatedly |
| ३८. | नैष्ठुर्यम् | क्रूरता | निष्ठुरता | নিষ্ঠুরতা | Ruthlessness |
| ३९. | अकस्मात् | हठात् | हठात् | অকস্মাৎ | Suddenly |
| ४०. | निर्दयम् | दयाहीनम् | दयाहीन | নির্দয় | Unkind |

हितोपदेशस्य मित्रलाभभागस्य परिशीलनेन अधिगतशब्देषु केचन शब्दाः भाषासामर्थ्यविकासाय प्रस्तूयन्ते। एतेषां शब्दानां सावधानं सार्थमध्ययनम् अस्माभिः करिष्यते चेत् अस्माकीनं भाषाध्ययनं निश्चयेन सफलीभविष्यति।

एतान् शब्दान् अतिरिच्यापि इतोऽपि केचन शब्दाः अत्र प्रस्तूयन्ते। तद्यथा– विरक्तः, आलिङ्ग्य, परिणीता, गरीयसी, स्वातन्त्र्यम्, संसर्गः, उपभोक्तुम्, उपजायते, चपला, विश्रुतम्, प्रार्तयन्ति, सुप्रतिष्ठितम्, खनित्वा, चिरसञ्चितम्, सत्रासम्, विरहितः, आकर्ण्य, विशीर्यते, गर्हितम्, परिभ्रष्टः, निर्विण्णः, विमृश्य, विडम्बनाः, नैराश्यम्, अवलम्बितम्, सौख्यम्, सङ्गमः, निन्दितमतिः, संबन्धः, निधाय, अतिरिच्यते, शोचितुम्, विवशाः, हरितीकृताः इत्यादयः। इत्थं हितोपदेशग्रन्थे विद्यमानानाम् अन्येषां शब्दानाम् अध्ययनं कार्यम्।

**कथासरित्सागरः**

कथासरित्सागरः कथासाहित्ये शिरोमणिग्रन्थत्वेन प्रथते। काश्मीरस्थः पण्डितः सोमदेवः एतं ग्रन्थं त्रिगर्त्तस्य राज्ञः पुत्र्याः तथा च काश्मीरराजस्य अनन्तराजस्य पत्न्याः सूर्यमत्याः मनोविनोदाय ई. १०६३ तः १०८१ तमे कालखण्डे व्यरचयत्। अयं ग्रन्थः १८ लम्बकेसु विभक्तः वर्तते। 'बृहत्कथायाः सारस्य संग्रहं रचमाम्यहम्' इत्युल्लिख्य कथाख्यानां नदीनाम् अयं सागरः अस्ति इति सोमदेवेन उक्तम्। प्रवाहमयी शैली रोचकतादि अस्य ग्रन्थस्य प्रधानवैशिष्ट्यं वर्तते। कथासमुद्रस्य कथासरित्सागरस्य अस्मात् कथापीठलम्बकात् केचन शब्दाः अत्र प्रस्तूयन्ते भाषाप्रयोगसामर्थ्यविकाशाय। इमे शब्दाः यथा–

**उपसंहारः**

संस्कृतभाषाध्ययनं किञ्चन विशिष्टं तपः। इदं तपः यैः आचर्यते तेषां पुरतः संस्कृतशब्दाः नरीनृत्येरन्। सर्वैः अपि संस्कृताध्येतृभिः संस्कृतभाषास्तरवर्धनं कार्यम्। संस्कृतभाषास्तरवर्धनेन कदाचित्





| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| यथाशक्ति | आविर्भूय | सम्प्राप्य | भृशम् | आलोक्य | सम्पद्यते | अभिप्रेतम् | परिज्ञातुम् | निरूप्य | आलोच्य |
| विधीयते | विदितः | विज्ञप्तः | आदाय | पुत्रकः | सन्तोष्य | निर्मुक्ता | प्रत्यभिज्ञता | चेष्टितम् | निशम्य |
| उद्यमः | वर्णयामि | सुप्तोत्थितः | दिव्यम् | निशम्य | आमन्त्र्य | मिश्रितम् | मोहयति | समाहूय | विज्ञप्तः |
| विश्रुतः | वर्णितम् | नियुक्ता | आकर्ण्य | विश्वस्तः | प्रेक्षितुम् | निक्षिप्तः | आसाद्य | निश्चित्य | दरतिक्रमः |
| रम्या | प्रक्षाप्य | निर्भर्त्सितः | सद्यः | विनिपत्य | समाख्यातम् | निर्वाप्य | सञ्चिन्त्य | अचिरात् | आश्रित्य |

शास्त्रसंरक्षणमपि सम्भवेत्, नूतनग्रन्थसंरचना अपि सम्भवेत्। भाषास्तरवर्धनाय बहवः उपायाः स्युः। विद्यमानेषु एतेषु उपायेषु अयम् उपायः अपि कश्चन विशिष्टः अस्ति। कथासाहित्येषु कथाकारैः कृताः प्रयोगाः ध्यानेन परिशील्यन्ते चेत् अस्माकं भाषास्तरः नितरां वर्धेत। तदर्थं चितानां शब्दानां संग्रहणात् परं ते शब्दाः परिशीलनीयाः, व्यवहारपथम् आनेतव्याः च। न तु कथासाहित्यम् अपि तु संस्कृते यत् किमपि साहित्यं भवतु अथवा यः कोऽपि ग्रन्थः भवतु नाम, तत् अर्थदृष्ट्या भाषास्तरवर्धनदृष्ट्या अस्माभिः अधीयते चेत् अस्माकं भाषास्तरः निश्चयेन वर्धिष्यते इत्यत्र नास्ति संशयः। इति शम्।

——





**सन्दर्भग्रन्थसूची**


१. डा. सत्यनारायणचक्रवर्ती, हितोपदेशः, कोलकाता, संस्कृत पुस्तक भाण्डार, १९९८
२. डा. बालशास्त्री, हितोपदेशः, वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०१७
३. प्रो. बालशास्त्री, पञ्चतन्त्रम्, वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०१८
४. स्व. प. केदारनाथ शर्मा सारस्वत, कथासरित्सागर, पटना, बिहारराष्ट्रभाषापरिषद्, १९६०
५. Jha Damodar, Vetalpanchavimsati, Varanasi, Chowkhamba Vidyabhawan, 2014

# अद्वैतसिद्धौ तद्व्याख्याने च नव्यन्यायशास्त्रयुक्तिभिः व्यवस्थापितानां कतिपय निष्कर्षाणां विवेचनम्

**डा. आर् बालमुरुगः**

**उपोद्घातः**

अथ पुरुषार्थेषु अभ्यर्हितस्य निःश्रेयसस्य प्राप्त्युपायविधाने दत्तचित्तेषु दर्शनेषु मध्ये निरतिशयं स्थानं बिभर्ति वेदान्तदर्शनम्। सुप्रथितं वर्तते इदं यत्तस्मिन्नद्वैतवेदान्तदर्शने द्वैतिनां कुदूषणपेषणार्थं निर्विचिकित्सितरूपेण वेदान्तासिद्धान्तास्थापनाय च श्रीमधुसूदनसरस्वतीस्वामिपादैः प्रणीतं ग्रन्थरत्नमद्वैतसिद्धिः विद्वद्भिः महता गौरवेण समाद्रियते इति। न्यायशास्त्रीययुक्तिभूयिष्ठादस्माद् ग्रन्थात् कतिपयविचारसन्दर्भाणां विमर्शाधारेण न्यायतन्त्रस्य अद्वैतसिद्धौ प्रभावः इति शीर्षके शोधप्रबन्धं प्रणेतुं प्रयते।

**प्रथमविप्रतिपत्तौ पक्षविशेषणविचारः**

श्रुतिबलेन प्रपञ्चः मिथ्येति अद्वैतिनः व्यवस्थापयितुं प्रवर्तन्ते। प्रपञ्चः न मिथ्येति द्वैतिनः प्रत्यवतिष्ठन्ते। एवं विवादे प्राप्ते मतद्वयाभिप्रायबोधनायाद्वैतसिद्धावेवं विप्रतिपत्तिः प्रदर्शिता– **'तत्र मिथ्यात्वे विप्रतिपत्तिः ब्रह्मप्रमातिरिक्ताबाध्यत्वेसति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा'**[१] इति। मिथ्यात्वशब्दस्यार्थः भवति प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्, तच्च विप्रतिपत्तौ विधिकोटिरद्वैतिनां, नेति तादृशप्रतियोगित्वाभावः निषेधकोटिः द्वैतिनां च वर्तते। ब्रह्मप्रमातिरिक्ताबाध्ये सत्त्वेन प्रतीत्यर्हे ब्रह्मणि मिथ्यात्वन्नास्तीति बाधवारणाय चिद्भिन्नत्वं पक्षे विशेषणमुपात्तं वर्तते। तथासति ब्रह्मणि चिद्भिन्नत्वाभावान्न बाधः। एवं चिद्भिन्ने





तादृशाबाध्ये तुच्छे (शशविषाणादिकं यदलीकं तत्तुच्छमिति व्यपदिश्यते) मिथ्यात्वाभावेन प्रसक्तबाधवारणाय सत्त्वेन प्रतीत्यर्हत्वं विशेषणम्। सत्त्वप्रकारकप्रतीतिविशेष्यत्वयोग्यत्वं तस्यार्थः। तुच्छे तदभावान्न दोषः।

चरमस्य ब्रह्मप्रमातिरिक्ताबाध्यत्वविशेषणस्य सार्थक्यविचारे सिद्धिकारैरेवं प्रतिपादितं यदत्र पक्षतावच्चेदकसामानाधिकरण्येन साध्यसाधनमभिप्रेतमुत पक्षतावच्छेदकावच्छेदेन। यदि प्रथमः पक्षः तदा पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तादृशसिद्धेः विरोधित्वमभ्युपगच्छतां मते सत्त्वेन प्रतीत्यर्हे चिद्भिन्ने शुक्तिरूप्ये मिथ्यात्वं मतद्वये सिद्धमिति सिद्धसाधनापत्तिः। शुक्तौ प्रतिभासमानरजतस्यापि पक्षतावच्छेदकाक्रान्ततया शुक्तिरूप्यं मिथ्येति निर्णयः अद्वैतिनां मिथ्यात्वानुमितौ प्रतिबन्धकः इत्यतः नानुमितिस्सम्भवतीति भावः। अतः ब्रह्मप्रमातिरिक्तबाध्यत्व-विशेषणमुपादेयम्, शुक्तिरूप्यस्य ब्रह्मप्रमातिरिक्ताधिष्ठानतत्वसाक्षात्कारेण नेदं रजतम्, इयं शक्तिरित्याकारकेण बाध्यत्वेन न शुक्तिरूप्यं पक्षकोटिप्रविष्टमिदानीमिति न सिद्धसाधनं प्रसज्यते।

इदमत्रावश्यमवगन्तव्यं यदनुमितिः द्विधा वर्तते। पक्षतावच्छेदकसामानाधिकरण्येन साध्यावगाहिनी प्रथमा, तदवच्छेदकावच्छेदेन साध्यावगाहिनी द्वितीया। प्रथमा पक्षतावच्छेदकसाध्ययोः समाानाधिकरण्यमात्रमवगाहते। अपरा पक्षतावच्चेदकव्यापकत्वं साध्येऽवगाहते। तच्च व्यापकत्वं न प्रकारतयानुमितौ भासते, किन्तु साध्यसंसर्गघटकतया। यथा पर्वतो वह्निमानित्यत्र पर्वतत्वव्यापकवह्निप्रतियोगिकसंयोगसम्बन्धेन वह्निमान् पर्वतः इत्याकारिकानुमितिः द्वितीया भवति। अनुमितिवत् साध्यनिश्चयोपि द्विविधः भवति। प्रथमानुमितिं प्रति द्विविधसाध्यनिश्चयः प्रतिबन्धकः, द्वितीयानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यनिश्चयः एव प्रतिबन्धकः इत्यादिकं तत्त्वचिन्तामणौ पक्षताप्रकरणे तद्व्याख्याने दीधित्यादौ सविशदं प्रतिपादितं वर्तते।

परन्तु न कुत्रापि वेदान्तग्रन्थे अनुमितेः द्वैविध्यं प्रतिपादितं वर्तते। एवं स्थिते सिद्धिकाराणामित्थं लेखनम्- **'अत्र च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात् पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति मते शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतराबाध्यत्वं पक्षविशेषणम्'**[२] इति न्यायशास्त्राध्ययनसंस्कारप्रभावेण सञ्जातिमिति सुस्पष्टं ज्ञायते। **'पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति मते'** इति सिद्धिग्रन्थेन पक्षतावच्छेदकसामानाधिकरण्येन साध्यनिश्चयः तादृशानुमितिं प्रति प्रतिबन्धकः न भवतीति केषाञ्चिदभिप्रायः वर्तते इति अवगम्यते। यद्यपि उक्तासिद्धिग्रन्थेन तेषामभिप्रायः न स्फुटः तथापि पक्षताप्रकरणपरामर्शेन मतविशेषस्य भावः स्पष्टः भवति। तथाहि पक्षतावच्छेदकसामानाधिकरण्येन यस्मिन् धर्मिणि साध्यनिर्णयः वर्तते तत्रैव तादृशानुमितिः न भवितुमर्हति धर्म्यन्तरे तादृशानुमितिः निराबाधैव। विशेष्यतासंबन्धेन पक्षतावच्छेदकसामानाधिकरण्येन साध्यवत्तानिश्चयः विशेष्यतासंबन्धेन तादृशानुमितिं प्रति विरोधीति विषयनिष्ठप्रत्यासत्त्या वा प्रतिबध्यप्रतिबन्धकभावोऽभ्युपगम्यते। विशेष्यतासम्बन्धेन यस्मिन् धर्मिविशेषे तादृशसाध्यनिर्णयः न वर्तते तत्र सुतरामनुमितिः जायते इति प्राचीननैयायिकैकदेशिनां मतं वर्तते।

मतमिदमनुसृत्य प्रतिबध्यप्रतिबन्धकभावे सङ्कोचः प्रादर्शि दीधितिकारैः पक्षतायाम् यथा- **'यदि च पर्वतत्वसामानाधिकरण्येन एकत्र साध्यसिद्धावपि विनाऽनुमित्सां अन्यत्र तादृशानुमितिः आनुभविकी तदा धर्मिविशेषोऽपि निवेश्यः नान्यथा'**[३] इति। पर्वतत्वेति कथनं प्रकृताभिप्रायेण। पक्षतावच्छेदकसामानाधिकरण्येनेति तस्यार्थः। पक्षतावच्छेदकसामानाधिकरण्येन तद्धर्मिविशेष्यकानुमितिं प्रति तादृशतद्धर्मि विशेष्यकसाध्यनिर्णयः प्रतिबन्धकः इत्येवं धर्मिभेदेन प्रतिबन्धकता कल्पनीयेति तदर्थः।

एवञ्च सत्त्वेन प्रतीत्यर्हत्वविशिष्टचिद्भिन्नत्वसामानाधिकरण्येन





शुक्तिरूप्ये मिथ्यात्वनिश्चयः तेन रूपेण घटादौ मिथ्यात्वानुमितिविरोधी न भवतीति स्वीकर्तृपक्षे ब्रह्मप्रमातिरिक्ताबाध्यत्वविशेषणं पक्षे न प्रवेश्यमिति भावः। न्यायशास्त्रीय- सिद्धान्तानवलम्ब्य प्रकृतप्रसङ्गे पक्षविशेषणविचारः प्रवर्तते इत्यवधेयम्।

**मिथ्यात्वानुमाने सन्दिग्धानैकान्तिकत्वनिराकरणे न्यायशास्त्रोपष्टम्भकता**- एतदनु सिद्धिकाराः प्रत्येकं वा विप्रतिपत्तिः इति ग्रन्थेन आकाशादिपक्षकविप्रतिपत्तीः प्रदर्श्य घटादौ सन्दिग्धानैकान्तिकत्वमाशङ्क्य तन्निराकरणाय सन्दिग्धानैकान्तिकत्वस्वरूपं निधार्य च नैयायिकानामेव सिद्धान्तमुपष्टम्भकतया स्वीयनिर्धारणे प्रादर्शयन्। तथाहि **'प्रत्येकं वा विप्रतिपत्तिः। वियत् मिथ्या न वा, पृथिवी मिथ्या न वेति। एवं वियदादेः प्रत्येकं पक्षत्वेऽपि न घटादौ सन्दिग्धानैकान्तिकता, पक्षसमत्वाद् घटादे'**[४] इति।

**अयं भावः**

आकाशादिपक्षकमिथ्यात्वानुमाने घटे सन्दिग्धानैकान्तिकत्व-स्यावकाशः वर्तते इति भाति। सन्दिग्धानैकान्तिकत्वञ्च व्यभिचारसंशयः एव। व्यभिचारसंशयः व्याप्तिग्रहप्रतिबन्धनद्वारानुमितौ (परम्परया) विरोधी भवति। यथा धूमाभाववति वह्निः वर्तते न वेति संशयः वह्नौ धूमव्याप्तिनिर्णयप्रतिबन्धकः तथा प्रकृते मिथ्यात्वाभाववति घटादौ दृश्यत्वमस्ति न वेति संशयः दृश्यत्वे मिथ्यात्वव्याप्तिग्रहप्रतिबन्धकः वाच्यः, तादृशः संशयः न प्रकृते वर्तते। दृश्ये घटेऽपि आकाशादितुल्यतया मिथ्यात्वसंशयः एव वर्तते। अतः अत्र व्याप्तिग्रहविरोधित्वेनाभिमतसंशयस्याकारः इत्थं वाच्यः दृश्यः घटः मिथ्यात्वाभाववान् न वा इति। निश्चितहेतुमति साध्यसंशयः अर्थात् साध्यप्रकारकसंशयविशेष्यीभूतधर्मिणि हेतोः वृत्तित्वनिश्चयः व्याप्तिग्रहप्रतिबन्धकः एव न भवति। पक्षे इवान्यत्रापि साध्यसंशयः अनुमितौ अनुकूलः एव न प्रतिकूलः भवति। अतः साध्यभावनिश्चयविशेष्ये धर्मिणि हेतोः वृत्तित्वसंशयः एव

व्याप्तिग्रहविरोधित्वाद् व्यभिचारसंशयः भवति न पूर्वोक्तविपरीतः। इदमेव व्यभिचारसंशयस्य स्वरूपमित्यत्र प्राचीनतार्किकाणां मतं प्रमाणतयोपन्यस्तं वर्तते सिद्धिकारैः प्रकृतसन्दर्भे। यथा– **'अत एवोक्तं साध्याभावनिश्चयवति हेतुसन्देहे एव सन्दिग्धानैकान्तिकता'**[5] इति।

यद्यपि नव्यतार्किकैः साध्याभावनिश्चयवति धर्मिणि हेतोः वृत्तित्वसंशयः इव साध्यवत्तया संदिग्धे धर्मिणि हेतोः वृत्तित्वनिश्चयः अपि व्यभिचारसंशयः इत्यभ्युपगम्यते। तथाहि शक्तिरतिरिक्तः पदार्थः इति स्वीकर्तृभट्टमीमांसकमतनिराकरणाय शक्तिसाधकानुमानानि अनूद्य दूषितानि मणिकारैः। यथा **वह्निः अद्विष्ठातीन्द्रियधर्मसमवायी दाहजनकत्वादित्यनुमाने**[6] हेतुरप्रयोजकः इति दूषणमभिहितम्। पक्षे हेतुरस्तु साध्यं मास्त्वित्याक्षेपः एभ अप्रयोजकः हेतुरित्यस्यार्थः। प्रतिवादिनोद्भाविताक्षेपेण व्यभिचारसंशयः जायते। तस्य प्रागुक्तदिशानुमितिविरोधित्वं वाच्यम्। परन्तु वह्नौ पक्षे दाहजनकत्वरूपहेतुः निर्णीतः, साध्यमेव संदिग्धं वर्तते। तथाहि अद्विष्ठः (एकमात्रवृत्तिः) अतीन्द्रियः यः धर्मः शक्त्याख्यः, तत्समवायित्वं साध्यम्, तच्च न्यायमते वह्नौ नास्तीति मध्यस्थस्य मीमांसकनैयायिकमतद्वयाकलनेन वह्नौ साध्यसंशयः एव वर्तते। एवञ्च प्रकृते व्याप्तिग्रहविरोधित्वेन शक्तिसाधकानुमितिविघटकत्वेनोद्भावित–व्यभिचारसंशयः न पूर्वोक्तदिशा साध्याभावनिश्चयवति हेतुसंशयः वर्तते, तद्विपरीतं साध्यवत्तया सन्दिग्धे वह्नौ हेतुनिर्णयः एव। अस्य व्यभिचारसंशयस्य व्याप्तिग्रहविरोधितयोपन्यासवत् मिथ्यात्वानुमाने कुतः घटादौ व्यभिचारसंशयः न विरोधित्वेन प्रयोक्तुं शक्यः इति शङ्का जायते। तथापि उभयोः अनुमानयोः अस्ति कश्चिद् विवेकः।

तथाहि यस्मिन्ननुमाने हेतुः व्याप्तिग्राहकतर्कसम्बलितः वर्तते तत्र पूर्वोक्तः व्यभिचारसंशयः एव (निश्चितसाध्याभाववति हेतुसंशयः) एवानुमानविघटकः भवतीति स एव प्रतिवादिनोद्भावयितुं योग्यः। यत्र हेतुः न तथा (तादृशतर्कशून्यः) तत्र द्विविधव्यभिचारसंशयः अपि





अनुमानविघटकः। एवं प्रतिवादिनापि यथाकामं द्विविधव्यभिचारसंशययोर्मध्ये एकः प्रयोक्तुं शक्यते।

प्रकृते मिथ्यात्वानुमाने दृश्यत्वादौ मिथ्यात्वव्याप्तिग्राहकतर्काणां सिद्धिकारैः वक्ष्यमाणत्वादत्र प्रथमः व्यभिचारसंशयः एव प्रयोक्तव्यः नान्यविधः इति द्वितीयस्य व्यभिचारसंशयत्वन्नास्तीति निराकरणं युज्यते। मीमांसकानां शक्तिसाधकहेतुः तादृशतर्कशून्यः इत्यतः मणिकारैः यथाकामं साध्यवत्तया सन्दिग्धे हेतुनिश्चयरूपः द्वितीयः व्यभिचारसंशयः उद्भावितः इत्यवगन्तव्यम्। तथा च सिद्धिकाराणां प्रकृतप्रसङ्गे व्यभिचारशङ्कानिराकरणाय न्यायतन्त्रसिद्धान्ताः महदुपकारकाः वर्तन्ते इति अवधेयम्।

**श्रीगदाधरभट्टाचार्ययुक्त्या द्वितीयचतुर्थमिथ्यात्वयोः ऐक्यापत्तिनिराकरणम्**

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमिति मिथ्यात्वस्य द्वितीयं स्वरूपमुक्तं वर्तते सिद्धिकारैः यद्द्वितीयमिथ्यात्वमिति नाम्ना प्रसिद्धम्। तस्य द्वितीयमिथ्यात्वस्य सिद्ध–साधनादिदोषवारणाय केचन परिष्काराः विधेयाः भवन्ति येन तस्य स्वरूपं स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वमिति सिद्धिकारप्रोक्तचतुर्थमिथ्यात्वेन समानं संपद्यते। नचेष्टापत्तिः। भिन्नतयोपन्यस्तयोः मिथ्यात्वयोः परिष्कारः तथा विधेयः येन तयोः भेदः संरक्षितो भवेत्। द्वितीयचतुर्थमिथ्यात्वयोः भेदव्यवस्थापनाय श्रीमद्भिः विट्ठलेशोपाध्यायैः तादृशः उपायः अवलम्बितः यः उपायः श्रीगदाधरभट्टाचार्यैः पञ्चलक्षण्यां चतुर्थलक्षणे **सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपे** सम्बर्णितः वर्तते। तं विचारसन्दर्भं समासेनात्र सङ्कलयामि।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं द्वितीयमिथ्यात्वम्। तस्यार्थः इत्थं वर्णितः ब्रह्मानन्दस्वामिपादैः **'प्रतिपन्नः स्वप्रकारकधीविशेष्यः यः उपाधिः अधिकरणम्, तन्निष्ठो यस्त्रैकालिकनिषेधोऽत्यन्ताभावः, तत्प्रतियोगित्वमिति।'**[7] स्वपदेन मिथ्यात्वाश्रयः गृह्यते। शुक्तौ प्रतिभासमाने रजते लक्षणसमन्वयः इत्थं–

स्वप्रकारिका धीः इदं रजतमिति तादात्म्येन रजतप्रकारिका प्रतीतिः, तद्विशेष्यः इदत्वेन भासमाना शुक्तिः, तन्निष्ठः अत्यन्ताभावः नेदं रजतमिति प्रतीतिसिद्धरजतसामान्याभावः, तत्प्रतियोगित्वं शुक्तिरूप्येऽस्तीति।

एवमपि वेदान्तिनः अवयवावयविनोः तादात्म्यं सम्बन्धः इति स्वीकुर्वन्ति इति तादात्म्येन श्यामघटाश्रये कपाले संयोगेन घटो नास्तीति तादात्म्येन रक्तघटो नास्तीति च प्रतीत्या संयोगेन घटाभावप्रतियोगित्वं तादात्म्येन रक्तघटाभावप्रतियोगित्वञ्चादाय सिद्धसाधनापतिः। अतः स्वप्रकारकधीविशेष्य इत्यादेः यद्धर्मावच्छिन्नयतसम्बन्धावच्छिन्नप्रकारता-निरूपितविशेष्यतासमानाधिकरणात्यन्ताभावीयताद्धर्मावच्छिन्नतत्सम्बन्धावच्छिन्न प्रतियोगित्वमिति परिष्कारः कर्तव्यः। एवं शुक्तौ रजतनिषेधस्य इयं शुक्तिः नेदं रजतमिति प्रतीतिसिद्धस्य रजतत्वावच्छिन्नतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकस्य (तादात्म्येन रजतसामान्याभावस्य) प्रतियोगित्वं रजतसामान्ये एव वर्तते इति व्यवहारिकरजतेऽपि निष्कर्षितं मिथ्यात्वं सिद्धमिति सिद्धसाधनापत्तिः। अतः प्रतिपन्नोपाधौ सर्वत्र यः त्रैकालिकनिषेधः तत्प्रतियोगित्वमिति वक्तव्यम्। ततासति स्वप्रकारकधीविशेष्यसर्वान्तर्गतः व्यवहारिकरजतस्याधिष्ठानं रजतावयवोपि भवति। तत्र तादात्म्येन रजतसामान्याभावस्यासिद्धतया न दोषः।

एवं द्वैतिभिरपि घटादेरधिकरणे घटस्योत्पत्तेः पूर्वं तन्नाशानन्तरञ्च घटात्यन्ताभावस्य स्वीकारात्तदादाय (अर्थात् सामयिकात्यन्ताभावमादाय) सिद्धसाधनवारणाय त्रैकालिनिषेधः इत्युक्तम्। घटवति विद्यमानघटात्यन्ताभावः पराभ्युपगतः न त्रैकालिकः इति दोषः। एवञ्च सर्वत्रशब्दस्य व्यापकत्वार्थकतया द्वितीयमिथ्यात्वस्य स्वरूपमेवं सम्पन्नम्। यद्धर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रकारता-निरूपितविशेष्यताव्या पकात्यन्ताभावीयतद्धर्मावच्छिन्नतत्सम्बन्धा-वच्छिन्नप्रतियोगित्वमिति।





**चतुर्थमिथ्यात्वम्**

स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं चतुर्थं मिथ्यात्वं भवति। अस्य द्वितीयवैलक्षण्यायैवमर्थः वर्णितः सिद्धिकारैः- **'तच्च स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वम्। अतः पूर्ववैलक्षण्यम्'**[८] इति। मिथ्यात्वघटकैवकारः नान्ययोगव्यवच्छेदसमर्पकः। तथासति स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वे सति स्वात्यन्ताभावाधिक-रणान्यस्मिन्प्रतीयमानत्वमिति पर्यवस्यति। मिथ्यात्वघटक-स्वात्यन्ताभावः यदि स्वाश्रये वर्तते सुतरां स्वानाश्रये वर्तते इति तस्य केवलान्वयितया स्वात्यन्ताभावाधिकरणान्यः अप्रसिद्धः इति पर्यालोच्य प्रकृते एवकारः अशेषार्थकः अशेषत्वञ्च व्यापकत्वमित्याहुः श्रीब्रह्मानन्दस्वामिपादाः। यथा **'एवकारः अशेषार्थकः अशेषत्वं च व्यापकत्वम्'**[९] इति। असति बाधके उद्देश्यविधेयभावस्थले उद्देश्यतावच्छेदकव्यापकत्वं विधेये भासते इति व्युत्पत्तिः। तथा च स्वाश्रयस्य स्वाश्रयत्वेन प्रतीयमानार्थकतया स्वप्रकारकधीविशेष्यता-व्यापकात्यन्ताभावप्रतियोगित्वं चतुर्थमिथ्यात्वं भवति। अत्रापि पूर्वोक्तपरिष्काराणां योजनया द्वितीयचतुर्थमिथ्यात्वयोः स्वरूपमभिन्नं जातमिति कथमनयोः वैलक्षण्यं व्यवस्थाप्यमिति शङ्कायां श्रीगदाधरभट्टाचार्यैः साकल्यघटितलक्षणे प्रदर्शितं रीतिमबलम्ब्य द्वयोः वैलक्षण्यं प्रतिपाद्यते।

तथाहि सकलसाध्याभावन्निष्ठाभावप्रतियोगित्वमिति पञ्चलक्षण्यां मणिकारैरनूदितं चतुर्थलक्षणं भवति यत्साकल्यघटितलक्षणमिति नाम्ना प्रथितम्। अस्मिन् लक्षणे साध्ये तदभाववति च साकल्यं विशेषणं भवति। अस्य लक्षणस्य स्वयं भट्टाचार्याः दीधितिकारमतानुसारेण सकलानि यानि साध्यानि तदभावाधिकरणं यद्यद् भवति, तत्तन्निष्ठाभावप्रतियोगित्वमिति परिष्कारं प्रादर्शयन्। तदनु सकलशब्दस्य व्यापकत्वे तात्पर्यं मन्वानानां श्रीमथुरानाथतर्कवागीशवर्याणां मतमनूद्य विमृष्टवन्तः। यथा **'एतेन सकलशब्दस्य व्यापकत्वार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव एतल्लक्षणनिष्कृष्टार्थः'**[१०] इति।

ततः इदमवगन्तव्यं यत्यद्यपि सकलशब्दस्य व्यापकत्वे शक्तिः प्रथिता तथापि प्रातिस्विकरूपेण यावद्व्यक्तिबोधनेपि सामर्थ्यमस्तीति। तथा प्रकृतेऽपि द्वितीयमिथ्यात्वे श्रूयमाणेन सकलशब्दसमानार्थकसर्वत्र शब्देनापि प्रातिस्विकरूपेण यावदधिकरणव्यक्तयः बोध्यन्ते। अत्र द्वितीयमिथ्यात्वे सर्वत्रशब्देन प्रातिस्विकरूपेण यावद्व्यक्तिबोधने एव भट्टाचार्याणां रीतिः अवलम्बितेति मया विवक्षितम्। एवञ्च स्वप्रकारकधीविशेष्यत्वाधिकरणं यद्यद्, तत्तन्निष्ठाभावप्रतियोगित्वं द्वितीयं मिथ्यात्वं भवति। चतुर्थमिथ्यात्वम् एवकारबलेन व्यापकत्वघटितमिति व्यापकत्वघटकतयाऽधिकरणत्वरूपसामान्यरूपेण स्वाश्रयव्यक्तयः प्रविष्टाः। तथा च स्वप्रकारकधीविशेष्यताव्यापकात्यन्ताभावप्रतियोगित्वं चतुर्थं मिथ्यात्वं भवतीति द्वितीयचतुर्थमिथ्यात्वयोः वैलक्षण्यं वर्तते इति सर्वमनवद्यम्। उक्तञ्च विट्ठलेशोपाध्यायैः **'यद्यपि इदानीमुभयत्र विशेष्यविशेषणभावसाम्यम्, तथापि पूर्वत्र यावत्पदेन प्रतिस्विकरूपेण तत्तद्व्यक्तयो विवक्षिताः। अत्र तु व्यापकत्वमिति न पौनरुक्त्यम्, स्पष्टा चेयं रीतिः साकल्यलक्षणे गादाधर्याम्'**[११] इति।

**निगमनम्**

इत्थं स्थालीपुलाकन्यायेन कतिपयसन्दर्भाः अद्वैतसिद्धौ परामृष्टाः यत्र नव्यन्यायशास्त्रीयप्रणालिं सिद्धान्तञ्च स्वीकृत्य निष्कर्षः सिद्धिकारादिभिः समुपस्थाप्यते। तेनेदं निगमनं प्राप्यते यदद्वैतसिद्धौ सुयोग्यः प्रभावः नव्यप्राच्यन्यायशास्त्रस्य वर्तते इति।

——





**सन्दर्भग्रन्थसूची**

१. अद्वैतसिद्धिः- पुटसंख्या- २०
२. तत्रैव- पु. २३, २५
३. अनुमानगादाधरी-पक्षताप्रकरणम्- पु. १११२
४. अद्वैतसिद्धिः- पु. २७, २८
५. तत्रैव पु. २९
६. अनुमानगादाधरी-शक्तिवादप्रकरणम्- पु. २०२०, २०२३
७. अद्वैतसिद्धिः- पु. ९४
८. तत्रैव पु. १८२, १८३
९. तत्रैव पु. १८२
१०. अनुमानगादाधरी-पञ्चलक्षणीप्रकरणम्- चतुर्थलक्षणम्, पु. ११८
११. अद्वैतसिद्धिः- पु. १८३

प्रबन्धलेखनार्थं परामृष्टग्रन्थाः

१. अद्वैतसिद्धिः/कर्ता-श्रीमत्परमहंसमधुसूदनसरस्वती, विट्ठलेशीव्याख्योपबृंहितगौड-ब्रह्मानन्दीव्याख्यासहिता, सम्पादकः तथा टिप्पणीकारः पण्डितश्रीमहामहोपाध्याय अनन्तकृष्णशास्त्री, प्रकाशक निर्णयसागरः-मुम्बापुरी, सं. १९३७
२. अद्वैतसिद्धि, कर्ता- श्रीमधुसूदनसरस्वती, सम्पादकः तथा हिन्दीव्याख्याकारः स्वामियोगीन्द्रानन्दः, प्रकाशकः चौखम्बा विद्याभवनम्, वाराणसी, १९८४
३. अनुमानगादाधरी, कर्ता- श्रीमद् गदाधरभट्टाचार्यः, सम्पादकः पण्डितश्री ढुण्ढिराजशास्त्री, प्रकाशकः चौखम्नासंस्कृतसीरीज् आफिस, वाराणसी, सम्बत्सरः, १९७०
४. गादाधरी पञ्चलक्षणी, कृष्णंभट्टीन्यायरत्नव्याख्याद्वयभूषिता।
५. गादाधरी-पञ्चलक्षणी-बालबोधिनी, व्याख्याकारः महामहोपाध्यायः एन. एस. रामानुजताताचार्यः, प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।